 ISSN-2350-0700

# कालिदासीयकाव्येषु ज्ञानविज्ञानचिन्तनम्

**डॉ. पुष्कर आनन्दः**[१]

## सारांशः-

महाकविकालिदासस्य रचनासु न केवलं रसादीनामास्वादनम् उपमादीनामलङ्करणं प्रकृतीनां मनोहरचित्रणं पदानां लालित्यम् अर्थानां सौष्ठवं रीतीनां रसानुकूलरञ्जनं मनोभावानां मनोवैज्ञानिकसूक्ष्मचिन्तनं समुपलभ्यते अपि तु विविधवैज्ञानिकविषयाणाम् आयुर्विज्ञानज्योतिर्विज्ञानमनोविज्ञानशस्त्रविज्ञानादीनां प्रसङ्गानुकूलं विमर्शनं दरीदृश्यते। यद्यपि कालिदासीयकाव्येषु बहूनि स्थलानि वर्तन्ते यत्र कवेः सूक्ष्मवैज्ञानिकचिन्तनं दृग्गोचरी भवति तथापि न तावत्सर्वं शोधपत्रेऽस्मिन्नाकलयितुं शक्यते। ऽअत्र कतिपयैः प्रयोगैः दृष्टान्तैश्चमहाकविकालिदासस्य वैज्ञानिकचिन्तनं संक्षेपेण प्रस्तूयते।

लोकजीवनस्य विविधपरिस्थितीनां संवेदनात्मकं सूक्ष्मञ्च रूपं ये प्रत्यक्षीकुर्वते त एव सहृदयानां सन्निधिमाप्नुवन्ति, किञ्च कालजयिनश्च कवयो जायन्ते। यत्र संस्कृतसाहित्ये ज्ञानविज्ञानयोश्चर्चा स्यात्तत्र कालिदासस्य स्मरणं न भवेदिति कथं संभाव्यते? महाकविः कालिदास एव तादृशः कविः यस्य काव्येषु न केवलं शास्त्रीयं ज्ञानं विद्यते परञ्च सकलचराचरजीवानां हृत्सु सञ्चरतां सूक्ष्ममनोभावानामनुभूतिस्साक्षाद्दरीदृश्यते। अत एव अद्याप्येकविंशशताब्द्यांपि महाकविकालिदासः समाजे तथैव आद्रियते स्मर्यते यथा हि प्रत्नकाले। इदमेव कारणं यत्संस्कृतेतरजनैरपि संस्कृतसाहित्यस्य सामान्यार्थः कालिदास एवावगम्यते। अस्य महाकवेः नाटकमहाकाव्यगीतिकाव्येषु वा यथा हि व्यावहारिकं सामाजिकं राजनैतिकं प्राकृतिकं ज्ञानविज्ञानञ्चोपलभ्यते तथैव समस्तजीवानामन्तर्मनोभावचित्रणमपि दृश्यते। आधुनिकवैज्ञानिकैस्सततमनुसंधानेन यज्ज्ञायते तद्धि कालिदासेन अनायासेन अनुभूयते। कवेरस्य भौगोलिकं प्राकृतिकं ज्ञानञ्च सहैवावलोकनीयं चेन्मेघदूतं पठनीयम् अपरञ्च राजनैतिकं ज्ञानप्राचुर्यमन्वेषणीयं चेद्रघुवंशमध्येतव्यं किञ्च ऋतूनां

---

[१] सहायकाचार्यः (साहित्यम्) श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम् (आदर्शसंस्कृतमहाविद्यालयः), रमौली, दरभंगा, बिहार

रमणीयत्वमवेक्षणीयं नूनं हि ऋतुसंहारमवलोकनीयं, साहित्यस्याऽभूतपूर्वसौन्दर्यास्वादनेच्छा चेदभिज्ञानशाकुन्तलं सेव्यतां यथा हि जर्मनकविगेटेमहोदयेन मुक्तकण्ठेनोक्तम् -

**"वासन्तं कुसुमं फलं च युगपत् ग्रीष्मस्य सर्वं च यत्**
**यच्चान्यन्मनसो रसायनमतः सन्तर्पणं मोहनम्।**

**एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयोः**
**ऐश्वर्यं यदि वाञ्छसि प्रिय सखे! शाकुन्तलं सेव्यताम्॥**

अथेदानीं कालिदासीयकाव्येषूपलब्धानि कतिपयानि प्रत्यक्षोदाहरणानि प्रस्तूयन्ते। तैः हि कालिदासस्य प्रकृष्टवैज्ञानिकचिन्तनमभिव्यज्यते।

## पर्यावरणविज्ञानम्- (Environmental Science)

साम्प्रतिके युगे सर्वे जनाः पर्यावरणरक्षणाय चिन्तिताः दृश्यन्ते। देशे विदेशे सर्वत्र हि वैज्ञानिकानां संगोष्ठी आयोज्यते। परं महाकविकालिदासेन सहस्राब्दं पूर्वमेव भूतले वृष्टिः कथं भवेत् कथञ्च सस्यसमृद्धिः जायेत ईदृक्षाणां समस्यानाम् अत्यन्तसहजेन समाधानं प्रदत्तम्-

**"हविरावर्जितं होतस्त्वया विधिवदग्निषु।**
**वृष्टिर्भवति सस्यानामवग्रहविशोषिणाम्॥"**[१]

एकमपरमुदाहरणमप्यत्र द्रष्टव्यं कथं हि सिन्धुजलम् अर्कमरीचिभिरुष्णीभूय वाष्पतां याति ततश्च मेघरूपेण वर्षति अपि च जलसंघर्षणेन विद्युदुत्पद्यते यथा कालिदसः विवृणोति-

**"गर्भं दधत्यर्कमरीचयोऽस्मात् विवृद्धिमत्राश्नुवते वसूनि।**
**अबिन्धनं वह्निमसौ बिभर्त्ति प्रह्लादनं ज्योतिरजन्यनेन॥"**[२]

ज्योतिषां तापेन वाष्पीभूतं जलं वायुसंसर्गात् कथं हि मेघरूपत्वमाप्नोति किञ्च मेघस्य निर्माणं कथं सञ्जायते इति मेघस्याऽचेतनत्वप्रसङ्गे वैज्ञानिकतथ्यं सहजेन प्रस्तौति-

**"धूमज्योतिस्सलिलमरुतां सन्निपातः क्व मेघः**
**संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।**

---

[१] रघुवंशम्- १/६२

[२] रघुवंशम्-१३/४

**इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे**
**कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥"[१]**

पर्यावरणरक्षणस्य भावनातत्सम्बन्धिज्ञानं तेष्वेव भवितुं शक्नोति येषां प्रकृत्या सह हार्दिकः आत्मीयश्च सम्बन्धः स्यात्। संस्कृतवाङ्मये कालिदासस्त्वेकः तादृशः कविः यस्य प्राणाः प्रकृतावेव वसन्ति।

## आयुर्विज्ञानम्- (Medical Science)

यथा हि महाभारतस्य विषये ख्यातिर्वर्तते यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् तथैव कालिदाससाहित्येऽपि न केऽपि तादृशाः विषयाः दृश्यन्ते ये च महाकविना अस्पृष्टाः। न ह्यत्र विसंवादः यत्कालिदासस्य गतिर्यथा हि सामाजिकव्यावहारिकराजनैतिकविषयेषु दृश्यते तथैव सङ्गीतनृत्यादिविविधकलासु किञ्च आयुर्विज्ञानज्योतिर्विज्ञानमनोविज्ञानादिषु विविधज्ञानविज्ञानेषु अप्रतिहता ज्ञानधारा सततं प्रवहमाना दरीदृश्यते । आयुर्वेदशास्त्रस्य मूलं प्रयोजनं शरीररक्षा एव यतो हि शरीरं धर्मस्य मूलसाधनं वर्तते । शरीरं सदा स्वस्थं कथं स्यात् किञ्च रोगग्रस्ते सति कीदृशी समुचिता चिकित्सा भवेत् इति सर्वमायुर्वेदस्य प्रतिपाद्यं वर्तते। कालिदासीयकाव्यानामपि यदा अनुशीलनं कुर्मः तदा बहुषु स्थलेषु रोगाणां आयुर्विज्ञानसम्मतोपायाः लभ्यन्ते । अत्र केचन प्रसङ्गाः प्रस्तूयन्ते। मालविकाग्निमित्रे विदूषकं यदा सर्पः दशति तदा परिव्राजिका सर्पदंशस्योपचारमायुर्विज्ञानसम्मतं वक्ति-

**छेदो दंशस्य दाहो व क्षतेर्वा रक्तमोक्षणम्।**
**एतानि दष्टमात्राणामायुष्याः विप्रतिपत्तयः॥[२]**

इत्थं सर्पदंशस्य प्राथमिकोपचारः कालिदासेन न्यदर्शि। नैकानि स्थलान्यपितु बहुषु स्थलेषु स्वास्थ्यलाभविषयकाः प्रयोगाः दृश्यन्ते ।

## ज्योतिर्विज्ञानम् - (Astrological Science)

महाकविकालिदासेन स्वसाहित्ये ज्योतिर्विज्ञानस्य प्रयोगोऽपि यथावसरमकारि। अनेन चिकित्साशास्त्रेण सह ज्योतिषविद्यायाः अपि बहुसम्मानं प्रादर्शि। महाकविः विविधप्रकारकारिष्टनिवारणार्थं दैवज्ञानाम् आदेशान् ससम्मानमनुपालने रतिं दर्शयति। अभिज्ञानशाकुन्तले अस्य स्पष्टमुदाहरणं द्रष्टुं शक्यते यत्र वैखानसः महर्षिकण्वविषये कथयति-

---

[१] मेघदूतम्- पूर्वमेघ-५

[२] मालविकाग्निमित्रम्-४/४

**"इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय नियुज्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः"**[१]

किञ्चज्योतिषशास्त्रे एतस्य हार्दिकी निष्ठा मालविकाग्निमित्रस्यास्मिन्प्रसङ्गेऽपि द्रष्टुं शक्यते यत्र हि मालविका चतुष्पदं वस्तु गायति तदा तन्नेत्रं स्फुरति तदा सा आशान्विता भवति-

**" दुर्लभः प्रियो मे तस्मिन् भव हृदयनिराशम् अहो अपाङ्गको मे प्रस्फुरति किमपि वामकः।"**[२]

शकुनशास्त्रे स्त्रीणां वामनेत्रस्फुरणं शुभसूचकं भवतीति। कालिदासेन शकुनशास्त्रमपि यद्धि ज्योतिर्विज्ञानस्य एकमङ्गं वर्तते स्वसाहित्ये बहुषु स्थलेषु प्रायुजि । एकमपरमुदाहरणमत्र द्रष्टव्यम् , दुष्यन्तः यदा तपोवने प्रविशति तदा तस्य दक्षिणहस्तः स्फुरति स च चिन्तयति -

**"शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।**
**अथवा भवितव्यतानां द्वाराणि भवन्ति सर्वत्र॥"**[३]

अत्र बाहुः इत्युक्त्वा दक्षिणहस्तः सूचितः तस्य च स्फुरणं कश्चित् शुभफललाभं संसूचयति।

रघुवंशस्य प्रथमसर्गे रघोर्जन्मप्रसङ्गेऽपि कालिदासस्य ज्योतिषविषयकं गभीरज्ञानं स्पष्टं दृग्गोचरीभवति। रघोरुत्पत्तिकाले सर्वे ग्रहाः उच्चस्थाने स्थित्वा जातकस्य सर्वसम्पदं संसूचयन्ति। यथा हि ज्योतिर्विज्ञानसम्मतं कालिदासेनोक्तं -

**"ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसंपदम्।**
**असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम्।"**[४]

## भौगोलिकविज्ञानम्- (Geographical Science)

कालिदासस्य भौगोलिकज्ञानं मेघदूतकाव्ये स्पष्टमवलोकयितुं शक्यते। कालिदासेन मेघदूतकाव्ये रामगिरिपर्वतादारभ्य अलकापर्यन्तं यः मेघमार्गः प्रादर्शि तत्र न केवलं तस्य प्रकृतिप्रेम कल्पनाप्राचूर्यं च दृश्यते अपितु कवेर्भौगोलिकं ज्ञानमप्यभिव्यज्यते। कैश्चिट्टीकाकर्तृभिः नागपुरे रामगिरिस्थानकस्य अवस्थितिर्मन्यते कैश्चिच्च चित्रकूटे। चित्रकूटं भवतु वा नागपुरं कालिदासस्य यक्षः अत्यन्तसरसतया सविनयेन च मेघं रामगिरिपर्वतात् अलकापुरीं गन्तव्यमार्गमित्थं निर्दिशति-

**मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं**
**संदेशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम्।**

---

[१] अभिज्ञानशाकुन्तलम्- प्रथमाङ्के वैखानसस्योक्तिः

[२] मालविकाग्निमित्रम्-२/४

[३] अभिज्ञानशाकुन्तलम्-१/१६

[४] रघुवंशम्-३/१३

**खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र**
**क्षीणः क्षीणः परिलघुपयःस्रोतसां चोपभुज्य॥"**[१]

मेघस्य प्रयाणानुरूपं मार्गं निर्दिशन् यक्षः तमनुनयति यत्तेन अस्मात् स्थानात् प्रथममुत्तरदिशि गन्तव्यमिति- **"स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खम्......।"**[२] ततः मालवदेशादारभ्य आम्रकूटपर्वतमासाद्य रेवानदीं दृष्ट्वा दशार्णप्रदेशः प्राप्तव्यः। ततश्च वक्रमार्गेणोज्जयिनी गन्तव्या इति यक्षः मेघमित्थं संदिशतीति-

**"वक्रः पन्थाः यदपि भवतः प्रस्थितस्योत्तराशां**
**सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः.....।**[३]**"**

ततश्च रामगिरितः अलकापर्यन्तमागतानां निर्विन्ध्यावेत्रवतीचर्मण्वतीशिप्रासिन्धुगङ्गा-सरस्वत्यादीनां विविधनदीनां सौन्दर्यपूर्णं वर्णनं लभ्यते । इत्थं हिमालयमतिक्राम्य कैलासपर्वतस्याङ्के स्थितामलकां मेघः प्राप्स्यतीति । यक्षमाध्यमेन मेघदूतकाव्ये कालिदासेन सुविस्तृतभारतवर्षस्य सुस्पष्टं सम्पूर्णं मानचित्रं तथा उपस्थापितं यत्तेन सर्वाणि स्थलानि आत्मना पूर्वमेव निरीक्षितानि स्युः। किञ्च कालिदासस्य भौगोलिकज्ञानप्रमाणं रघुवंशमहाकाव्येऽपि रघोर्दिग्विजयप्रसङ्गे दृश्यते।

## शस्त्रविज्ञानम् - ( Weapon Science )

महाकविकालिदासः स्वभूपतीन् न केवलं शृङ्गारस्याऽवगाहने योजयति अपितु शास्त्रैस्सह शस्त्रज्ञानमपि प्रददाति। आधुनिकैः वैज्ञानिकैरद्यापि यदबोध्यं तच्छस्त्रज्ञानं कालिदासेन सहस्राब्दं पूर्वमेव स्वनृपतिमाध्यमेन प्रादर्शि । दृश्यतामत्र कथं हि दुष्यन्तस्य शराः अदृष्टं दूरस्थं वध्यं हन्तुमुद्यताः तैरेव शरैः अवध्याः रक्षणे समर्थाः - **"राजा- भो तिरस्कारिणीगर्वित! मदीयमस्त्रं द्रक्ष्यति । एष तमिषुं संदधे।"**

**"यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षिष्यति द्विजम् ।**
**हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः।"**[४]

कालिदासस्य राजानः शस्त्रविद्यायां तथा प्रवीणाः यत्तेषामिषवः शब्दं श्रुत्वा अदृश्यमपि सहजेन घ्नन्ति । अवलोक्यतामत्र राज्ञः दशरथस्य शब्दपातिनबाणप्रयोगः-

---

[१] मेघदूतम्- पूर्वमेघ-१३

[२] मेघदूतम्- पूर्वमेघ-१४

[३] मेघदूतम्- पूर्वमेघ-२९

[४] अभिज्ञानशाकुन्तलम्-६/२८

**"कुम्भपूरणभवः पटुरुच्चैरुच्चचार निनदोम्भसि तस्याः।**
**तत्र स द्विरदबृंहितशङ्की शब्दपातिनमिषुं विससर्ज।"[१]**

यथा हि वर्तमानवैज्ञानिकयुगे शस्त्रनिर्माणे प्रयोगे चानुदिनं नवत्वं दृश्यते तथैव कालिदाससाहित्ये बहुविधानि तादृशानि शस्त्राणि दृश्यन्ते यानि प्रयोगकर्तॄणामिच्छया प्रयुज्यन्ते। गन्धर्वस्य तच्छस्त्रमवलोक्यतां यद्धि सम्मोहनेन शत्रुम् अहत्वापि विजयश्रियं लभते-

**"सम्मोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम्।**
**गान्धर्वमादत्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते॥"[२]**

एतान् विचित्रशस्त्रप्रयोगान् दृष्ट्वा कालिदासस्य उन्नतं शस्त्रविज्ञानं स्पष्टं विज्ञायते।

## वैमानिकशास्त्रचिन्तनम् - (Thoughts For Aircraft)

महाकविकालिदासस्य रचनासु विमानानां निर्माणं कथं भवतीत्यस्य चर्चा भारद्वाजस्य वैमानिकशास्त्रवन्नोपलभ्यते परञ्चास्य काव्येषु विमानोड्डयनगत्यादिवैशिष्ट्यवर्णनेन विमानशास्त्रीयाऽभिज्ञानं विशिष्टचिन्तनञ्च वरीवर्त्तीति निश्चप्रचम्। अवलोक्यन्तामत्र केचन विमानोड्डयनप्रसङ्गाः-

रघुवंशस्य त्रयोदशसर्गे लङ्काविजयं पश्चात् पुष्पकविमानेन आकाशे विगाहमानौ सीतारामौ चेत्थं वर्णितौ-

**अथात्मनः शब्दगुणः गुणज्ञः पदं विमानेन विगाहमानः।**
**रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच॥[३]**

विमानयात्राप्रसङ्गे कालिदासेन तथाविधं विमानं वर्णितं यद्धि श्रीरामचन्द्रस्य मनोभावानुसारं सञ्चरति। तद्विमानं कदाचित्मेघे प्रविशति कदाचिच्च पतत्त्रिणाम्मध्ये डयते-

**क्वचित्पथा सञ्चरते सुराणा क्वचिद्घनानां पततां क्वचिच्च**
**यथाविधो मे मनसोऽभिलाषः प्रवर्तते पश्य तथा विमानम्॥[४]**

[१] रघुवंशम्-९/७३

[२] रघुवंशम्-५/५७

[३] रघुवंशम् १३-१

[४] रघुवंशम्१३-१९

आकाशमार्गे विमानाऽरूढैः सञ्चरद्भिः प्राणिभिः साक्षात्पर्वतनदीवृक्षसागरादीनां सूक्ष्मदर्शनं कथं हि क्रियते सा मनोरमा रसपूर्णा चानुभूतिः कालिदासेन एव अभिव्यक्तुं शक्यते। विमानादतिविस्तृता स्तिमितप्रवाहा गङ्गा कथं ह्यतिदूरात् अतिकृशकाया भूमेः कण्ठगतमुक्तावलीव रामेणावलोकिता इत्यत्र दृश्यताम्-

**एषा प्रसन्नस्तिमितप्रवाहा सरिद्विदूरान्तरभावतन्वी।**
**मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः॥**[१]

इत्थमेव शाकुन्तले मातलिना समं दुष्यन्तस्य आकाशादवतरणं सरसं वैज्ञानिकदृष्ट्या चोपवर्णितम्- इन्द्रस्य सहायतां कृत्वा दुष्यन्त यदा आकाशादवतरति स्म तदानीं स मातलिं कथयति "मेघपदवीमवतीर्णौ स्वः। मातलिः पृच्छति - कथमवगम्यते स प्रत्युत्तरति-

**अयमरविवरेभ्यश्चातकैर्निष्पतद्भिर्हरिभिरुचिरभासां तेजसा चानुलिप्तैः ।**
**गतमुपरि घनानां वारिगर्भोदराणां पिशुनयति रथस्ते शीकरक्लिन्ननेमिः॥**[२]

यद्यप्यत्र रथस्य वर्णनं विद्यते न तु विमानस्य तथाप्यत्र विमानोड्डयनगुणयुतोऽयं रथ इत्यस्मादुल्लेखितः। एतैः प्रयोगैः उदाहरणैश्चेदं कथमपि न निश्चीयते यत्कालिदास: विमानरचनाप्रक्रियाऽभिज्ञः आसीत् परञ्च इदमपि सत्यं प्रतीयते यत् महाकविकालिदासेन विमानस्योड्डयनवेगः सम्यक् अभिज्ञायते स्म ।

## राजनैतिकविज्ञानम् - (Political Science)

राष्ट्रस्य समुन्नतये समाजस्य समृद्धये च महाकविर्कालिदासः सततं चिन्तनशीलः दृश्यते। तस्य काव्यकला न केवलं प्रणयानुरञ्जनं कुरुते अपितु धर्मानुकूलश्रुतिस्मृत्यनुमोदित-राजनैतिकसामाजिकज्ञानप्रदानेऽपि सावसरं रमते। कालिदासस्य भूपतयः वर्णाश्रमधर्मानुकूलाः दृश्यन्ते । ते हि नृपाः त्यागाय धनं रक्षन्ति सत्याय नियन्त्रितं भाषन्ते यशसे विजयमभिलषन्ति किञ्च सन्तानोत्पत्तये गार्हस्थ्यमनुतिष्ठन्ते शैशवे विद्यामनुवर्तन्ते यौवने विषयमभिलषन्ति किञ्च वार्धक्ये मुनिवृत्तिमनुचरन्ति-

**"त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।**
**यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्॥**

---

[१] रघुवंशम्१३-४८

[२] शाकुन्तलम्- ७/७

**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।**
**वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥"**[१]

राजनैतिकसंदेशप्रसङ्गे राजानः सर्वदा प्रजानुरञ्जकाः भवेयुरिति कालिदासस्य स्पष्टमतिर्दरीदृश्यते । महाकवेः कालिदासस्य राजनीतौ औदात्यं दाक्षिण्यञ्चावलोक्यते। रघोः शासनं विवृण्वन् कालिदासः राज्ञः रघोः उदात्तदण्डविधानं प्रदर्शयति-

**"स हि सर्वस्य लोकस्य युक्तदण्डतया मतः ।**
**आददे नातिशीतोष्णो नभस्वानि दक्षिणः॥"**[२]

यद्यपि हि नयविद्भिः राज्ञि सदसत् च उपदिष्टं तथापि रघोः सदसतोर्मध्ये सदेवाभिमतमासीदित्यपि वर्णयति कालिदासः -

**"नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम्।**
**पूर्व एवाभवत् पक्षस्तस्मिन्नाभवदुत्तरः॥"**[३]

पुनश्च रघुवंशे कुशपुत्रस्यातिथेर्राज्यप्रशासनं प्रजापालनं किञ्च तस्य कुशलराजनीतिप्रबन्धनं निदर्शयति। सोऽतिथिर्नृपः यथाकालं स्वपन्नपि स्वेषु परेषु च क्षिप्तैः अविज्ञातपरस्परैः गुप्तचरैः सदा जागरूकः तिष्ठति-

**परेषु स्वेषु च क्षिप्तैरविज्ञातपरस्परैः ।**
**सोऽपसर्पैर्जजागार यथाकालं स्वपन्नपि॥"**[४]

तस्य राज्ये अर्थकामाभ्यां न कदापि धर्मः प्रतिहतः न च धर्मेण अर्थकामौ बाधितौ। इत्थं त्रिषु धर्मार्थकामेषु सादृश्यमासीदतीथेर्राज्ये-

**न धर्ममर्थकामाभ्यां बबाधे न च तेन तौ।**
**नार्थं कामेन कामं वा सोऽर्थेन सदृशस्त्रिषु॥"**[५]

कालिदासस्य राजनीतेः गूढं व्यावहारिकञ्च ज्ञानं राज्ञः अतिथेः प्रजापालने स्पष्टमवलोक्यते । अतिथेर्राज्ये निर्विघ्नतया सार्थवाहाः व्यापारं कुर्वन्ति स्म इत्यपि राज्यस्य समृद्धिमेव संसूचयतीति -

---

[१] रघुवंशम्-१/७

[२] रघुवंशम्-४/८

[३] रघुवंशम्-४/१०

[४] रघुवंशम्-१७/५१

[५] रघुवंशम्-१७/५७

**"वापिष्विव स्रवन्तीषु वनेषूपवनेष्विव।**
**सार्थाः स्वैरं स्वकीयेषु चेरूर्वेश्मस्विवाद्रिषु॥"[१]**

एवं हि कालिदासेन राज्ञां विविधकर्तव्यानि यथावसरं वर्णितानि येषु राजनैतिकज्ञानप्रवाहः दरीदृश्यते । राज्ञैर्यदि राजनीतेर्सम्यक् ज्ञानमवधार्यते तर्हि धरण्याऽपि प्रजापालनाय राड्भ्यः भूयिष्ठं सम्भूतिं प्रदीयते यथा हि चिन्तयति महाकविः-

**खनिभिः सुषुवे रत्नं क्षेत्रे सस्यं वनैर्गजान्।**
**दिदेश वेतनं तस्मै रक्षासदृशमेव भूः॥"[२]**

## मनोवैज्ञानिकचिन्तनम् - (Psychological Observation )

महाकविकालिदासेन स्वकाव्येषु युवकयुवतिबालवृद्धखगमृगादीनां समस्तप्राणीनां सूक्ष्मातिसूक्ष्ममनोभावानां यथा हि वर्णनमकारि न तथा कुत्रापि अन्यत्र दृश्यते । विविधपरिस्थितिषु विभिन्नप्राणीनां विविधाः मनोभावाः जागरिताः भवन्तीति तेषां मनोभावानां सूक्ष्ममनोवैज्ञानिकविश्लेषणे कालिदाससदृशाः विरला एव कवयः। प्रतिक्षणं परिवर्तमानेषु मनोभावेषु यथा कालिदासस्य प्रवेशो दृश्यते तथा तु कैश्चिन्मनोवैज्ञानिकैरपि असम्भाव्यं प्रतीयते। अवलोक्यतामत्र पतिगृहप्रथमगमनकाले स्वतनयायाः वियोगे पितॄणां मनसि कीदृशी व्यथा भवतीति तस्यानुभवः कालिदास एव कर्तुं क्षमः -

**"यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया**
**कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।**

**वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः**
**पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुखैर्नवैः॥" [३]**

शाकुन्तले न केवलमेकस्मिन् स्थले मनोभावानामवलोकनं भवत्यपितु सम्पूर्णमभिज्ञानशाकुन्तलमेव मनोवैज्ञानिकं वर्तते। कुत्रचित्कविः "कामी स्वतां पश्यतीत्युक्त्वा" कामीजनानां हृदयं स्पृशति क्वचिच्चाऽपमानेनाहतानां स्त्रीणां स्वाभाविकीं कोपोक्तिं प्रदर्श्य नारीहृदये सहजेन प्रविशति। दृश्यतामत्र दुष्यन्तेनाहतायाः शकुन्तलायाः कीदृशी मनोव्यथा अनेन व्यक्तीकृता-

---

[१] रघुवंशम्-१७/६४

[२] रघुवंशम्-१७/६६

[३] अभिज्ञानशाकुन्तलम्-४/६

**"अनार्य! आत्मनो हृदयानुमानेन प्रेक्षसे, क इदानीमन्यो धर्मकञ्चुकप्रवेशिनस्तृणच्छन्नकूपोमयस्य तवानुकृतिं प्रतिपत्स्ये?"**[१]

इत्थमेव रघुवंशमहाकाव्ये इन्दुमतीस्वयम्वरप्रसङ्गे इन्दुमत्याऽऽस्वीकृतराज्ञां विवर्णमनोभाव: कथं तावत्प्रदर्शित इत्यत्र दृश्यताम्-

**"सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिम्वरा सा।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावः स स भूमिपाल:॥"**[२]

कालिदासस्य मनोवैज्ञानिकप्रयोगाः न केवलं मानवेष्वपितु विविधजन्तूष्वपि दृश्यन्ते । शरपतनभयात् भयाक्रान्तस्य मृगस्य मनोहरं रूपमवलोक्यतामत्र-

**ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः**
**पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।**

**दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा**
**पश्योदग्रप्लुतत्वात् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ।"**[३]

अस्मिन् शोधपत्रे महाकवेर्कालिदासस्य सरसं वैज्ञानिकचिन्तनं प्रस्तुतं, कतिपयानि दृष्टान्तानि प्रदत्तानि। यद्यपि तेषां रचनासु शुद्धसाहित्यमेव प्रवहति तथापि, प्रसङ्गवशात् विविधवैज्ञानिकविषयाणां सरसं गुम्फनमपि कालिदासस्य वैशिष्ट्यम्।

## सन्दर्भग्रन्थसूचिः

१. रघुवंशम्-सम्पादकः व्याख्याकारश्च- श्रीकृष्णमणित्रिपाठी, चौखम्बासुरभारतीप्रकाशन, वाराणसी, २०१०
२. मेघदूतम्-सम्पादकः व्याख्याकारश्च- शेषराजरेग्मी, चौखम्बासुरभारतीप्रकाशन, वाराणसी, २०१०
३. मालविकाग्निमित्रम्-सम्पादकः व्याख्याकारश्च- रमाशंकरपाण्डेय, चौखम्बाप्रकाशन, वाराणसी, २०१२
४. अभिज्ञानशाकुन्तलम्-सम्पादकः व्याख्याकारश्च-श्रीकृष्णमणित्रिपाठी, चौखम्बाप्रकाशन

[१] अभिज्ञानशाकुन्तलम्- पंचमांके- शकुन्तलावचनम्

[२] रघुवंशम्-६/६७

[३] अभिज्ञानशाकुन्तलम्-१/७